श्री मत्स्य स्तोत्रं

श्री मत्स्य स्तोत्रं

नूनं त्वं भगवान् साक्षाद्धरिर्नारायणोऽव्ययः |
अनुग्रहाय भूतानां धत्से रूपं जलौकसां || 1 ||

नमस्ते पुरुषश्रेष्ठ स्थित्युत्पत्यप्ययेश्वर |
भक्तानां नः प्रपन्नानां मुख्यो ह्यात्मगतिर्विभो || 2 ||

सर्वे लीलावतारास्ते भूतानां भूतिहेतवः |
ज्ञातुमिच्छाम्यदो रूपं यदर्थं भवता धृतं || 3 ||

न तेऽरविंदाक्षपदोपसर्पणं
मृषा भावेत्सर्व सुहृत् प्रियात्मनः |
यथेतरेषां पृथगात्मनां सता-
-मदीदृशो यद्वपुरद्भुतं हि नः || 4 ||

इति श्रीमद्भागवते चतुर्विंशतितमोऽध्याये श्री मत्स्य स्तोत्रं ||